Engineer, *n.* यंत्रनियामकः, वास्तुविद्याकुशलः, यंत्रकारः; –ing, *n.* यंत्रशास्त्रं, यंत्रकारव्यापारः.

Engirdle, *vt.* See Encircle.

English, *a.* आंग्ल; *n.* आंग्लजनः, आंग्लभाषा.

Engorge, *vt.* सगर्धं खाद् 1 P, स्थूलखंडशः भक्ष् 10, निःशेषं भक्ष्; –ment, *n.* लोलुपतया भक्षणं.

Engraft, *vt.* वृक्षांतरे निविश् c, प्रवृत् c, गाढं प्रविश् c.

Engrain, *vt.* गाढं रंज् c, (गुणान् or सूत्राणि) रंज् c.

Engrasp, *vt.* ग्रह् 9 P, धृ 10.

Engrave, *vt.* दृढं धृ 10, उत्कॄ 6 P; –er, *n.* त्वष्टा; –ing, *n.* उत्किरणं.

Engross, *vt.* आकुलीकृ, अतिमात्रं ग्रह् 9 P; –ed, *a.* एकाग्र, आकुल; –er, *n.* पूर्वक्रेता. [नी 1 P.

Engulf, *vt.* निःशेषं निगॄ 6 P; अदर्शनं

Enhance, *vt.* मूल्यं वृध् c, पुष् 10, संभृ 3 U, उपचि 5 U; –ment, *n.* वर्धनं, उपचयः.

Enigma, *n.* कूटं, गूढप्रश्नः, प्रहेलिका; –tical, *a.* गूढार्थ, दुर्ज्ञेय; –tically, *adv.* गूढं, अस्फुटार्थं. [प्रवृत् c.

Enjoin, *vt.* आदिश् 6 P, आज्ञा c,

Enjoy, *vt.* उपभुज् 7 A; आस्वाद् 10; *vi.* मुद् 1 A; –able, *a.* उपभोगक्षम, सुखद; –ment, *n* उपभोगः, आनंदः; प्रभुत्वं; आस्वादः; objects of e. ment विषयाः.

Enkindle, *vt.* समिंध् 7 A, ज्वल् c.

Enlarge, *vt.* वृध् c, विस्तृ c, *vi.* वृध् 1 A, वितन् pass. विस्तृ pass; (upon) प्रपंचयति, वर्ण् 10;–ment, *n.* विस्तारः, प्रपंचः, विस्तरः.

Enlighten, *vt.* संस्कृ 8 U, प्रकाश् c, उद्दीप् c; –ed, *a.* प्रबुद्ध, परिणतप्रज्ञ; –ment, *n.* संस्कारः, चित्तप्रबोधनं.

Enlist, *vt.* पत्रं आरुह् c, आकृष् 6 P.

Enliven, *vt.* समुत्सह् c, हृष् c; –ing *a.* हर्षजनक.

Enmity, See under Enemy.

Ennoble, *vt.* उन्नतिं प्राप् c, प्रतिष्ठां प्राप् c; –ment, *n.* उन्नतिः, उत्कर्षः, औदार्य.

Ennui, *n.* ग्लानिः, खेदः, अरतिः.

Enormity, *n.* महापापं, घोरता, दारुणातिक्रमः.

Enormous, *a*, अतिमात्र, स्थूल, बृहत्, दारुण; –ly, *adv.* अतिमात्रं, भृशं, घोरं.

Enough, *a.* पर्याप्त, इच्छानुरूप, प्रभूत; *adv.* अलं, कृतं, पर्याप्तं; to be e. for कृप् 1 A; *n.* पर्याप्तिः, प्रभूतता; having e. for maintenance, अलंजीविक.

Enquire,-y, See Inquire,-y.

Enrage, *vt.* प्रकुप् c, संक्षुभ् c; –ed, *a.* उद्दीपितामर्ष, प्रकोपित; to be e. ed, कुप्, क्रुध् 4 P.

Enrapture, *vt.* हर्षपरवशं कृ 8 U, अतिहर्षेण मुह् c; –ed, *a.* आनंदजड, हर्षोन्मत्त; to be e. ed, अत्यंतं हृष् 4 P, हर्षेण मुह् 4 P.

Enravish, *vt.* See Enrapture; –ment, *n.* हर्षपरवशता, हर्षोन्मादः.

Enrich, *vt.* धनीकृ 8 U, भूष् 10.

Enroll, *vt.* लेखपटे निविश् c, लेखारूढ–कृ 8 U; –er, *n.* नामलेखकः; –ment, *n.* नामारोपणं, नामनिवेशः.

Enrooted, *a.* बद्ध or दृढ–मूल.

Ensanguined, *a.* रुधिरावृत, रक्ताक्त.

Ensconce, *vt.* See Conceal.

Enshrine, *vt.* सुप्रतिष्ठितस्थाने निविश् c, रक्ष् 1 P.

Ensign, *n.* केतुवाहः, अधिकारचिह्नं, नौकावैजयंती.

Enslave, *vt.* दासीकृ, वशे स्था c; –ment, *n.* बंधनं, पारतंत्र्यं.

Ensnare, *vt* जाले ग्रह् 9 P, छद्मना अभिभू 1 P.

Ensue, *vi.* समापद् 4A, अनुगम् 1 P, आगम्; –ing, *a.* आगामिन्, भाविन्; on the e. ing day परेद्युः.

Ensure, *vt.* निश्चित–कृ 8 U, दृढीकृ.

Entail, *vt.* आसंज् c, जन् c; रिक्थं प्रदा 1, 3 P; *n.* क्रमागतं रिक्थं, क्रमागतनिधिः.

Entangle, *vt.* संग्रंथ् 9 P, आकुलीकृ 8 U, संभ्रम् c; –ed, *a.* आसक्त, संकीर्ण, व्यावर्तित; e. ed hair जटा, सटा; –ment, *n.* आकुलीकरणं, संकुलता, जटिलत्वं.

Enter, *vt.* प्रविश् 6 P, गाह् 1 A, पदं कृ 8 U; (name) लिख् 6 P, निविश् c; e. on a course, कार्ये प्रवृत् 1 A.

Entrance *n.* प्रवेशः, द्वारं, उपक्रमः,

प्रवेशाधिकारः.
Entry, *n.* पत्रारोपणं; द्वारं, प्रवेशवीथिः
Enterprise, *n.* व्यवसितं, आरंभः; साहसं; उत्साहः, *vt.* आरभ् 1 A, प्रक्रम् 1 A; –ing *a.* निर्भीक, शूर; उत्थानशील, साहसिक.
Entertain, *vt.* संमन् c, आतिथ्यं कृ 8 U, स्वागतेन संभू c, भाषणेन रंज् c, विनुद् c, धृ c, प्रमुद् c; –er, *n.* विनोदकः, सत्कर्ता; –ment, *n.* सत्कारः, पूजा; आतिथ्यं; विनोदः; मिष्टान्नभोजनं; उत्सवः.
Enthral, *vt.* दासीकृ 8 U, बंधनं नी 1 P.
Enthrone, *vt.* राज्ये अभिषिच् 6 P, नृपतिपदं आरुह् c.
Enthusiasm, *n.* चित्तोत्साहः, श्रद्धोत्कर्षः, उत्साहः, धर्मोन्मादः.
Enthusiast, *n.* भक्तिव्यग्रः, श्रद्धोन्मत्तः, उत्साही, श्रद्धातिसक्तः, –ic, ical, *a.* सोत्साह, उत्सुक, उत्कटादर, श्रद्धावश; –ically *adv.* दृढश्रद्धं, अत्यंतं.
Entice, *vt.* आकृष् 6 P, विलुभ् c, उत्पथं प्राप् c; –ment, *n.* आमिषं, आकर्षणं, वंचनं.
Entire, *a.* अविकल, समग्र, तत्पर, एकनिष्ठ, शुद्ध, अहार्य; –ly, *adv.* कात्स्न्र्येन, सर्वशः, सर्वथा; –ness, –ty, *n.* समग्रता, अखंडता; आर्जवं.
Entitle, *vt.* नाम कृ 8 U; अधिकृ 8 U; to be e. ed अर्ह् 1 P; e. ed to a share अंशाधिकारिणः, अंशभाजः; e. ed to praise प्रशस्यं.
Entity, *n.* वस्तु, भावः, सत्त्वं, सत्ता.
Entomb, *vt.* सर्वथा प्रच्छद् c, निगुह् 1 P, समाधौ निखन् 1 P.
Entrails, *n.* अंत्राणि (pl.), पुरीतत् *n.*
Entrance, *vt.* मूर्च्छां प्राप् c, मुह् c; –ed, *a.* मूर्च्छित, उन्मत्त.
Entrap, See Ensnare.
Entreat, *vt.* अभ्यर्थ् 10 A, याच् 1 A, सांजलि प्रार्थ् 10 A, प्रसद् c; –y, *n.* अभ्यर्थना, अंजलिकर्म, अनुनयः; –ing, *a.* सानुनय, सविनय.
Entree, *n.* प्रवेशः, पक्वान्नविशेषाः.
Entrepot, *n.* भांडागारं, पण्यसंग्रहशाला.
Entrench, See Intrench.
Entrust, *vt.* निक्षिप् 6 P, हस्ते सम्‌ृ c; न्यासीकृ 8 U.
Entwine, *vt.* ग्रंथ् 9 P, परिगुह् 1 P; रच् 10.
Enucleate, *vt.* विशदीकृ 8 U, विशुध् c.
Enumerate, *vt.* परिगण् 10, संख्या 2 P; –ion *n.* परिगणना, संख्यानं.
Enunciate, *vt.* उपन्यस् 4 P, उत्कृत् 10, उदाहृ 1 P; –ion, *n.* उदीरणं, उपन्यासः, स्वरूपकथनं; –ive, *a.* ख्यापक.
Envelop, *vt.* अवगुंठ् 10, आवेष्ट् 10, परिवृ 8 U, गुह् 1 P, कोशे निधा 3 U; –e., *n.* पत्रकोशः–पुटं; प्रावारः, अवगुंठनं.
Envenom, *vt.* सविषीकृ 8 U, दुष् c, प्रक्षुभ् c.
Environ, *vt.* परिवेष्ट् 10, परिवृ 8 U, संवृ, निरुध् 7 U; e. s *n.* परिसरः, उपांतः, उपपुरं; –ment *n.* परिवेष्टनं, परिस्थितिः.
Envoy, *n.* संधिदूतः, सामप्रणिधिः.
Envy, *vi.* ईर्ष्य् 1 P, मृष् 4 P, 10; स्पृह् 10; *n.* असूया, ईर्ष्या, अमर्षणं

–able, *a.* स्पृहणीय, ईर्ष्याविषय; –ier, *n.* असूयक, ईर्ष्यी, मत्सरी; –ous, *a.* असूयक, सेर्ष्य, साभ्यसूय; –ously *adv.* सेर्ष्यं, सासूयं,मात्सर्येण.

Ephemeral, *a.* नश्वर, क्षणिक.

Epic, *n.* महाकाव्यं, वीरचरितं. [लिंग.

Epicene, *a.* स्त्रीपुंससाधारण, उभय-

Epicure, *n.* मिष्टान्नभोजी, भोजनचंचुः, विषयसुखपरायणः; –an, *a.* जिव्हा-लौल्यप्रसक्त; –anism, *n.* विषयसेवा, विषयसुखाधीनत्वं.

Epicycle, *n.* परिचक्रं, परिधिः.

Epidemic,-al, *a.* बहुजनाभिभाविन्, सर्वगामिन्, संचारिन्; e. disease, जनमारः, महामारी.

Epidermis, *n.* बहिस्त्वक्, बाह्यचर्म.

Epiglottis, *n.* उपजिह्वा, घंटिका.

Epigram, *n.* विदग्धमुखमंडनं.

Epilepsy, *n.* अपस्मारः.

Epileptic, *a.* अपस्मारिन्.

Epilogue, *n.* उपसंहारः.

Episcopacy, *n.* धर्माध्यक्षाधिकारः.

Episode, *n* उपाख्यानं; –ic, –ical प्रासंगिक, अप्रस्तुत.

Epispastic, *a.* स्फोटजनक.

Epistle, *n.* पत्रं, लेखः, लेख्यं.

Epistolary, *a.* पत्रात्मक.

Epitaph, *n.* मृतस्मृतिलेखः, चैत्यो-पलिपिः, स्तंभलिपिः.

Epithalamium, *n.* विवाहगीतं.

Epithem, *n.* उप-प्र-लेपः. [पाधिः.

Epithet, *n.* विशेषणं, योगसंज्ञा, उ-

Epitome, *n.* संहृतिः, संक्षेपः, सारः; –ize, *vt.* संक्षिप् 6 P, समस् 4 P; –izer, *n.* संक्षेप्ता.

Epoch, *n.* गणनारंभः, कालविशेषः, शाकः, शकः; –making अब्दारंभक.

Epode, *n.* तंत्रीकाव्यं.

Epopee *n.* महाकाव्यवस्तु, इतिवृत्तं.

Equable, *a.* सम, निर्विकार, प्रशांत.

Equal, *a.* तुल्याकार, समान, समर्थ, प्रभु, समवृत्ति; *n.* समः, सवयः, समा-नपदस्थः; *vt.* समीकृ 8 U, तुल् 10; to consider e. तुलया धृ 10; he is equal to the task अलंकर्मीणोऽसौ; –ity, *n.* साम्यं, तुलना, समवस्था; एकरूपता; –ize, *vt.* समीकृ 8 U; –ly, *adv.* तुल्यं, समं. [कारता.

Equanimity, *n.* समचित्तत्वं, निर्वि-

Equanimous, *a.* धीर, स्थितधी.

Equation, *n.* समीकरणं, साम्यं.

Equator, *n.* भूपरिधिः, विषुवरेखा; celestial e. व्योमकक्षा; –ial re-gion निरक्षदेशः.

Equery, *n.* मंदुरा, अश्वपालः.

Equiangular, *a.* समकोण, समानास्र.

Equestrian, *a.* अश्वीय, *n.* आश्विकः, अश्वारोहः.

Equidistant, *a.* तुल्यांतर.

Equilateral, *a.* समभुज. [वस्थानं.

Equilibrium, *n.* साम्यं, तुल्यविरोधा-

Equine, *a.* अश्वीय, अश्ववत्.

Equinox, *n.* विषुवं, विषुवत्; vernal e. महाविषुवं, हरिपदं; autumnal e. जलविषुवं.

Equinoctial, *a.* विषुवीय; e. line, विषुवद् वृत्तं; e. point अयनं.

Equip, *vt.* उपकरणानि समाहृ 1 P, सज्जीकृ 8 U; e. with arms संनह् c;– age, *n.* उपकरणजातं, परिवारः, सज्जा, कल्पना; –ment, *n.* सज्जा, संभारः.

Equipoise *n.* see Equilibrium.

Equipollent, *a.* तुल्यबल, समान.

Equiponderant, *a.* तुल्यभार, समतोल.

Equitable, *a.* शुचि, न्याय्य, समवृत्ति, न्यायप्रवृत्त; –y *adv.* न्यायेन, समवृत्त्या; –ness *n.* न्याय्यता, अपक्षपातः.

Equity, *n.* न्याय्यता; अपक्षपातः, सारासारविचारः.

Equivalent, *a.* तुल्यार्घ, तुल्यबल, समानार्थ; *n.* प्रतिफलं, पर्यायः.

Equivocal, *a.* अस्फुटार्थ, अनिश्चित, अनेकार्थ, संदिग्धार्थ; –ly *adv.* वक्रोक्त्या, संदिग्धार्थं; –ness, *n.* संदिग्धार्थः, अर्थसंदेहः.

Equivocate, *vi.* अस्फुटार्थं भाष् 1 A, वाक्यभेदं कृ 8 U; –ion, *n.* वक्रोक्तिः, वाक्छलं.

Equivoque, *n.* कूटोक्तिः, वक्रभणितं.

Era, *n.* शाकः, कालविशेषः.

Eradiate, *vt.* स्फुर् 6 P; लस् 1 P.

Eradicate, *vt.* उत्खन् 1 P, समूलं उत्पट् c, (उन्मूलयति); –ion, *n.* उन्मूलनं, उत्पाटनं; –or, *n.* उत्पाटकः, उच्छेदकरः.

Erase, *vt.* अपमृज् 2 P, लुप् c; –ure, *n.* व्यामर्षः, विनाशः.

Ere, *adv. prep.* प्राक्, पूर्वं; e. this अतःपूर्वं; e. long अचिरेण; e. now नातिचिरात्प्राक्; e. while किंचित्पूर्वं.

Erect, *a.* उन्नत; स्थिर, धीर; with the hair e. पुलकित, रोमांचित; *vt.* स्था c, निर्मा 2 P, 3 A; उच्छ्रि c; –ion, *n.* निर्माणं, स्थापना, उन्नयनं, उत्क्षेपः; e. ion of the hair रोमोद्गमः, पुलकः.

Erode, *vt.* क्रमशः खाद् 1 P, अवसद् c.

Erotic, *a.* कामपर, कामुक.

Err, *vi.* व्यभिचर् 1 P, स्खल् 1 P, प्रमद् 4 P, उत्पथं या 2 P; –ant, *a.* परिभ्रमणशील, पर्यटनपर; –atic, *a.* चंचल, अनियत.

Errand, *n.* संदेशः, वाचिकं, दौत्यं; send on an e. प्रतिशास् 2 P, आदिश् 1 P.

Erroneous, *a.* भ्रांत, सत्येतर, अनृत; e. notion; मिथ्याग्रहः –ly, *adv.* मिथ्या, मृषा, भ्रांत्या.

Error, *n.* प्रमादः, स्खलितं, अपराधः, भ्रमः, मोहः, उन्मार्गगमनं.

Errata, *n.* लेखदोषाः, लिपिप्रमादाः.

Erst, *adv.* पुरा, प्राक्, पूर्वकाले.

Eructation, *n.* उद्गारः, उत्क्षेपः.

Erudite, *a.* प्रज्ञ, श्रुतवत्, विपश्चित्; –ion, *n.* व्युत्पत्तिः, पांडित्यं, ज्ञानं.

Eruption, *n.* स्फोटः, आपातः, उद्भेदः, e. on the skin, दद्रुः, विस्फोटः.

Erysipelas, *n.* दद्रुः.

Escalade, *vt.* निश्रेण्या आरुह् 1 P. लंघ् 10; *n.* दुर्गलंघनं.

Escape, *vt.* परिहृ 1 P, वृज् 10; क्षेमेण अपसृ 1 P. *vi.* निर्गम् 1 P, पलाय् 1 A, अपया 2 P; *n.* पलायनं,

अपयानं; रक्षणं, विपन्मोचनं, निस्तारः, मुक्तिः. [जस्वीभूतं क्षेत्रादि.
Escheat, *vi.* राजसात्भू 1 P, *n.* रा-
Eschew, *vt.* परिहृ 1 P, वृज् 10 अपहा 3 P.
Escort, *n.* परिवारः, रक्षिवर्गः; रक्षणं, *vt.* रक्षार्थं अनुव्रज् 1 P, परिचर् 1 P.
Esculent, *a.* खाद्य, भक्ष्य; *n.* खाद्यं, अभ्यवहार्यं.
Escutcheon, *n.* कुलचिह्नपत्रं.
Esophagus, *n.* अन्नवाहिस्रोतः.
Esoteric, *a.* गूढ, रहस्य, अलौकिक.
Especial, *a.* विशिष्ट, प्रधान, अग्र्य; -ly, *adv.* मुख्यशः, विशेषतः.
Espionage, *n.* अपसर्पणं, गूढावेक्षणं, चारप्रयोगः. [मिः.
Esplanade, *n.* नगरपरिसरः, क्रीडाभू-
Espouse *vt.* परिग्रह् 9 P, परिणी 1 P, अंगीकृ 8 U, अनुपाल् 10; -al *n.* परिग्रहः, स्वीकारः, आलंबनं, अनुपालनं.
Espy, *vt.* दूरात् अवलोक् 1 A, 10; निरूप् 10, उपलक्ष् 10.
Esquire *n.* फलकपाणिः, उपयोधः, श्री०, आर्य०
Essay, *vt.* आरभ् 1 A, उपक्रम् 1 A, व्यवसो 4 P; *n.* प्रयत्नः, आरंभः, निबंधः; -ist, *n.* निबंधलेखकः. [र्षः.
Essence, *n.* सारः, तत्वं, भावः, निष्क-
Essential, *a.* शुद्ध, आवश्यक, गरिष्ठ, अग्र्य, *n.* तत्वं, मूलं, परमार्थः; -ly, *adv.* सारतः, तत्वतः, अवश्यं.
Establish, *vt.* प्रतिष्ठा c, (द्रढयति,) समर्थ् 10; व्यवस्था c; -ment, *n.* संस्थापनं, प्रतिपादनं, भृत्यादिवर्गः.
Estate, *n.* परिग्रहः, रिक्थं, भूधनं, स्थितिः, वर्गः.
Esteem, *vt.* आदृ 4 A, संमन् c, पूज् 10 *n.* मतं; आदरः, पूजा.
Estimable, *a.* आदरार्ह, पूजार्ह, मान्य.
Estimate, *vt.* विगण् 10, निरूप् 10, मूल्यं निर्णी 1 P; *n.* गणना, मूल्यसंभावना, मतं; Rough e. स्थूलमानं; in the popular e. लोकमतेन; -ion, *n.* अर्घकल्पना; पूजा, गणना; -or *n.* गणकः, संख्याता.
Estrange, *vt.* अपरंज् c, स्नेहं त्यज् c; वियुज् c; -ed, *a.* अपरक्त, विमुखीकृत, विश्लेषित; -ment, *n.* अपरागः, स्नेहनिवृत्तिः, भेदः.
Estuary, *n.* नदमुखं, पुटभेदः.
Estuation, *n.* फेनोद्गमः, संक्षोभः.
Et cetera, *a.* आदि, प्रभृति, आद्य.
Etch, *vt.* लिख् 6 P, चित्र् 10.
Eternal, *a.* शाश्वत, चिरंतन, सनातन, अविकार्य; -ly, *adv.* शश्वत्, चिरं, नित्यं. [अनंतकालः.
Eternity, *n.* नित्यत्वं, आनंत्यं,
Ether, *n.* आकाशं, तेजोवहः; -eal, *a.* नाभस, दिव्य, तैजस. [बंधिन्.
Ethic, al, *a.* आचारविषयक, नीतिसं-
Ethically, *adv.* नितिदृष्ट्या, आचारानुसारेण. [विषयक.
Ethnic, -al, *a.* अन्यदेशीय, जाति-
Ethnology, *n.* नृवंशविद्या, -शास्त्रं.
Ethology, *n.* परिस्थितिपरिणामशास्त्रं.
Etiology, *n.* निदानशास्त्रं.
Etiquette, *n.* आचारः, शिष्टाचारः.

Etymological, *a.* व्युत्पत्तिविषयक; e. sense यौगिकार्थः.
Etymologist, *n.* व्युत्पत्तिकोविदः.
Etymologize, *vt.* व्युत्पद् c, सिध् c.
Etymology, *n.* व्युत्पत्तिः.
Eulogize, *vt.* प्रशंस् 1 P, स्तु 2 U, कृत् 10. [प्रशंसकः.
Eulogist, *n.* स्तुतिपाठकः, बंदी,
Eulogistic, *a.* प्रशंसापर, स्तुतिमय.
Eulogy, *n.* प्रशंसा, स्तुतिः
Eunuch, *n.* क्लीबः, षंढः, कंचुकी.
Euphemism, *n.* मंगलभाषितं, मृदूक्तिः.
Euphonic, euphonious *a.* सुखश्रव, श्रुतिसुभग. [सुखोच्चारणं.
Euphony, *n.* स्वरसौष्ठवं, स्वरलालित्यं,
Eureka, *n.* धन्योऽहमिति आनंदध्वनिः.
Evacuate, *vt*, रिच् 7 U, आवृज् c, त्यज् 1 P; –ion, *n.* रिक्तीकरणं, परित्यागः, उत्सर्गः, उच्चारः.
Evade, *vt*, निपुणं परिहृ 1 P, वंच् 10, अपलप् 1 P; पलाय् 1 A; वाक्छलं कृ 8 U. [अंतर्धानं.
Evanescence, *n.* लोपः, अदर्शनं,
Evanescent, *a.* नश्वर, क्षणिक, गत्वर.
Evaporate *vi.* बाष्पीभू 1 P; विनश् 4 P, अंतर्धा pass.
Evasion, *n.* परिहारः, वर्जनं, वंचनं, वाक्छलं, अपदेशः, छद्म.
Evasive, *a.* छलगर्भ, वक्र, कुटिल; e. answer वक्रोत्तरं;–ly *adv.* वाक्छलेन, वक्रोक्त्या.
Evaporate, *vt.* बाष्पीभू 1 P; शनैः क्षि pass; *vt.* बाष्पीकृ 8 U; उदीर् 10, उद् गॄ 6 P; –ed, *a.* आतपशुष्क; --ion, *n.* बाष्पीभवनं, –करणं.
Eve, *n.* पूर्वप्रदोषः, दिनांतः, रात्रिमुखं.
Even, *n.* संध्या, दिनांतः; *a.* सम, ऋजु e. handed समक्रिय; e. minded समवृत्ति; *vt.* समीकृ 8 U; *adv.* अपि, किंच; e. though, e. if यद्यपि; e. now अद्यापि; e. so एवं, अथ किं; e. as यथा, यथैव; –ly *adv.* समं, निर्विकारं; –ness, *n.* समता, निर्विकारता.
Evening, *n.* दिनांतः, सायंकालः, रात्रिमुखं; in the e. सायं; good e. to you, शुभस्ते प्रदोषः; *a.* सायंतन.
Event, *n.* वृत्तं, व्यतिकरः, परिणतिः, उदर्कः; in the e. of यदि, चेत्; -ful, *a.* वृत्तबहुल, स्मरणीयवृत्त; --ual, *a.* कार्यरूप, अंत्य, आनुषंगिक; –ually *adv.* अवसाने, उदर्के, अंततः.
Ever, *adv.* सदा, कदापि, जातु; not e. नकदाचन; for e. शश्वत्, निरंतरं; lost for e. एकांतनष्ट; gone for e. असंनिवृत्तये गतः; e. more पुनः, इतः परं; e. and anon काले काले, मुहुर्मुहुः; e. since यतः प्रभृति; e. so little मनागपि; अंशेनापि; e. blooming नित्यपुष्प; e. green नित्यहरित; e. lasting चिरस्थायिन्, अक्षय्य.
Evert, *vt.* विपर्यस् c, विनश् c.
Every, *a.* सर्व, एकैक; e. day प्रतिदिनं; in e. place स्थानेस्थाने; e. other एकैकं परित्यज्य अन्यः; in e. way सर्वथा; e. where सर्वत्र, यत्रतत्र; e. time यदायदा; on e. side समंततः, सर्वतः.

Evict, *vt.* भूमिं त्यज् c, निःसृ c.

Evidence, *n.* साक्षी, प्रमाणं, निदर्शनं; ocular e. प्रत्यक्षप्रमाणं; *vt.* स्था c, उपपद् c, प्रमाणीकृ 8 U.

Evident, *a.* स्पष्ट, विशद, स्फुट, प्रत्यक्ष; make e. प्रकाश् c, विवृ 5 U; to be e. स्फुटीभू 1 P;-ly, *adv.* स्फुटं, व्यक्तं, प्रत्यक्षं.

Evil, *a.* दुष्ट, कुत्सित, पाप, निंद्य; -intentioned दुराशय; e. passions दुर्विकाराः; *e. eye* पापदृष्टिः; *e. co-urse* कुपथं; e. conduct दुर्वृत्तं, निंद्याचारः; -minded दुष्टबुद्धि, दुरात्मन्; *n.* शाठ्यं, विपद्, व्यसनं; अनिष्टं; अशुभं, पापं; धर्मविप्लवः; अपकारः, हिंसा.

Evince, *vt.* प्रकाश् c, प्रतिपद् c. स्था c; -ibly, *adv.* स्पष्टं, व्यक्तं, -ive *a.* दर्शक, द्योतक, गमक.

Eviscerate, *vt.* निरंत्रीकृ 8 U.

Evitable, *a.* परिहार्य, वर्जनीय.

Evoke, *vt.* आह्वे 1 P, प्रबुध् c.

Evocation, *n.* आह्वानं; बहिष्करणं.

Evolve, *vt.* विकस् c, उद्भिद् 7 U, उपचि 5 U, विस्तृ c.

Evolution, *n.* उद्भेदः, विस्तारः, परंपरा, मूललाभः, परिणामः, विवर्तः; theory of e. अभिव्यक्तिवादः.

Evulsion, *n.* उत्पाटनं, अवलुंचनं.

Ewe, *n.* अजा, मेषी.

Ewer, *n.* कमंडलुः, कुंभः.

Exacerbate, *vt.* क्षुभ् c, कुप् c; -ion *n.* प्रकोपः, वृद्धिः.

Exact, *a.* नियत, सूक्ष्म, निपुण, यथार्थ, शुद्ध; *vt.* बलात् आदा 3 A, निष्कृष् 1 P.

Exaggerate, *v t.* अतिशयेन वर्ण् 10, अधिकार्थं वच् 2P; -ion *n.* अतिवादः, अत्युक्तिः.

Exalt, *vt.* उन्नम् c,उच्छ्रि c;- ation, *n.* उन्नतिः, अभ्युदयः.

Examine, *vt.* परीक्ष्, 1 A, निरूप् 10, निर्णी 7 U, अन्विष् 4 P; -ation *n.* परीक्षा, निरूपणं; -e *n.* परीक्षार्थी; -er *n.* परीक्षकः.

Example, *n.* उदाहरणं, निदर्शनं, प्रमाणं, आदर्शः; for e. यथा.

Exasperate, प्रकुप् c, क्षुभ् c- 10 *n.* क्रोधः, मन्युः, रोषः, तिग्मता.

Excavate, *vt.* उत्खन् 1 P. विदृ 10 -ion *n.* विदारणं, खातं; e. underneath the *ground* सुरंगाः; -*or n.* खनकः.

Exceed, *vt.* अति-इ 2 P. क्रम्, 4 P. शी 3A; -ing, *a.* आतिशयिन्, अत्यंत; -ingly, *adv.* अत्यंतं, अतिमात्रं.

Excel, *vt.* अतिशी 2 A, अतिरिच् pas; विशिष् pas; -ence, *n.* विशिष्टता, गुणोत्कर्षः, परभागः; -*ency*, *n.* उत्कर्षः; महाराजः; -ent, *a.* उत्कृष्ट, अग्र, प्रवर.

Except, *prep.* विना, ऋते; *vt.* वृज् 10, विहा 3 P, मुच् 6 P; -ion, *n.* अपवादः, परिवर्जनं, दोषः, बाधा; -ional, *a.* अलौकिक, असाधारण; -*ionable*, *a.* परिहरणीय, वर्ज्य; -ionally *adv.* अनन्यसाधारणभावेन, विशेषतः.

Excerpt *vt.* उत्-ह्र 1 P; -ion उद्धारः, संकलनं.
Excess, *n.* उत्कर्षः अतिशयः, अतिमात्रा; -ive, *a.* अत्यंत, अतिमात्र.
Exchange, *vt.* वि-निमे 1 A, प्रतिदा 1 P, 3 U; *n.* विनिमयः, परिवर्तः; श्रेष्ठिचत्वरं.
Excheqner, *n.* राजकोषः.
Excise, *vt.* राजदेयं निर्धृ 10, *n.* राजदेयं, करः; -man शुल्कग्राहः, कराध्यक्षः.
Excision, *n.* कर्तनं, उच्छेदः.
Excite, *vt.* उत्तिज् c, प्रोत्सह् c, उत्पद् c; -able *a.* उत्तेजनीय; -ment उत्तेजनं, क्षोभः. कामोद्दीपनं.
Exclaim, *vi.* उच्चैः उदीर् c, घुष् 10.
Exclamation, *n.* उत्क्रोशः, घोषणं.
Exclamatory, *a.* भावोच्छ्वासप्रकाशकारिन्. [वृज् 10.
Exclude, *vt.* निषिध् 1P, बहिष्कृ 8U,
Exclusion, *n.* निषेधः, व्यावृत्तिः, बहिष्करणं, व्युदासः.
Exclusive, *a.* केवल, व्यावर्तक; -ly, *adv*. केवलं.
Excogitate, *vt.* चिंत् 10, परिक्लृप् c.
Excommunicate, *vt.* बहिष्कृ 8 U, अपांक्तीकृ 8U; -ion, *n.* बहिष्कारः, समाजच्युतिः
Excoriate, *vt.* निष्कुष् 9 P; -ion. *n.* त्वग्भेदः.
Excrement, *n.* विष्ठा, पुरीषं.
Excrescence, *n.* गंडः, शोफः
Excrete, *vt.* उत्सृज् 6 P; निःसृ c.
Excruciate, *vt.* अत्यंतं पीड 10, प्रमंथ् 9 P; -ing *a.* अरुंतुद, प्रमाथिन्, असह्य. -ion, *n.* तीव्रवेदना.
Exculpate, *vt.* निर्दोषीकृ 8 U, दोषं प्रमृज् 2 P; -ion, *n.* दोषशुद्धिः; -ory, *a.* दोषापनोदक.
Excursion, *n.* विहारः, क्रमणं, अप्रस्तुतानुसरणं.
Excursive, *a.* भ्रमणशील.
Excuse, *vt.* क्षम् 1 A, मृष् 10, *n,* हेतुवादः, व्याजः, व्यपदेशः-less, *a.* असमर्थनीय; -able क्षमार्ह.
Execrable, *a.* गर्ह्य, नीच.
Execrate, *vt.* शप् 1 U, गर्ह् 1 P. 10;-ion, *n.* अभिसंपातः, घृणा.
Execute, *vt.* अनुष्ठा 1 P, निर्वृत् c, हन् 2 P, प्राणदंडं आदिश् 6 P. -ion, *n.* अनुष्ठानं, निर्वहणं, वधः, -ioner, *n.* घातकः, -ive, *a.* विधायक, -or, *n.* मृतलिखितनिर्वाहकः.
Exegesis, *n.* प्रवचनं, व्याख्यानं.
Exegetical, *a.* विवरणकृत्.
Exemplar, *n.* आदर्शः;-y *a.* अनुकरणीय.
Exemplify, *vt.* उदाहृ 1 P; -ication, *n.* उदाहरणं, निदर्शनं.
Exempt, *vt.* मुच् 6 P. नियमाननुष्ठानं अनुज्ञा 9 U; *a.* मुक्त, नियमस्याविषयः; -ion, *n.* मुक्तिः, अनुष्ठानाभावः, नियमशैथिल्यं.
Exequies, *n.* अंत्यविधिः.
Exercise, *vt.* प्रयुज् 7 U, अभ्यस् 4 P, आसेव् 1 A, *vi.* व्यायामं कृ,

8 U; *n.* प्रयोगः, अभ्यासः, उद्यमः.

Exert, *vt.* उपयुज् 7 A, व्याप्तृ c.;-ion, *n.* व्यवसायः, उद्यमः, आयासः.

Exhale, *vt.* उद् गॄ 6 P, उदीर् 10, बाष्पी कृ 8 U;-ation, *n.* उद्गारः, बाष्पः, बाष्पोद्गमनं.

Exhaust, *vt.* शून्यीकृ 8 U, निःशेषं उपयुज् 7 A, खिद् c; -ion, *n.* अपचयः, ग्लानिः; -less *a.* अक्षय्य, अनपायिन्; -ive *a.* क्रांतिकर, चूडान्त, सर्वांगपूर्ण.

Exhibit, *vt.* प्रदृश् c, आविष्कृ 8 U, अभिनी 1 U. -ion *n.* प्रदर्शनं.

Exhilarate, *vt.* नंद् c, हृष् c, *vi.* प्रमुद् 1 A, प्री 4 A; -ion प्रमोदः, उल्लासः.

Exhort, *vt.* अनुनी 1 P, अनुशास् 2 P, प्रोत्सह् c;-ation, *n.* अनुनयः, परामर्शः, प्रोत्साहनं; -ative, *a.* प्रबोधक.

Exhume, *vt.* उत्खन् 1 P; -ation [उत्खननं.

Exigence, -cy *n.* नितान्तप्रयोजनं, विपत्कालः.

Exile, *v. t.* निर्वस् c, निष्कस् c; *n.* [निर्वासनं, प्रव्रजनं.

Exist, *vi.* वृत् 1 A, धृ 6 A, जीव् 1 P, स्था 1 P; -ence, *n.* अस्तित्वं, भावः, जीवितं, प्राणधारणं; -ent, *a.* सत्, विद्यमान.

Exit, *n.* प्रस्थानं, निर्याणं, मरणं, पथः.

Exodus, *n.* प्रस्थानं.

Exogamy, *n.* भिन्नगोत्रे विवाहविधिः.

Exonerate, *vt.* निर्दोषीकृ 8 U, अपनीतभारं कृ 8 U.

Exorable, *a.* अनुनेय, कोमल.

Exorbitant, *a.* अतिमात्र, अत्यंत.

Exorbitance, -cy, *n.* अतिरेकः, सीमातिक्रमः.

Exorcise, *vt.* (भूतानि) विद्रु c, भूतावेशात् मुच् c.

Exorcism, *n.* भूतापसारणं.

Exordium, *n.* प्रस्तावः, वाङ्मुखं.

Exoteric, *a.* साधारण, प्रकाश्य, लौकिक.

Exotic *a.* विदेशज, वैदेशिक.

Expand, *vt.* विस्तृ c, विवृ 5 U, विकाश् c, *vi.* प्रसृ 1 P, स्फुट् 6 P, विजृंभ् 1 A.

Expanse, *n.* विस्तारः, आभोगः, आयामः; -ion, *n.* विस्तारः, प्रपंचः, बहुलीभवनं; -ive; *a.* व्यापक, विस्तारशील.

Ex-parte *a.* एकपक्षीय.

Expatiate, *vi.* (प्रपंचयति,) विस्तरेण निरूप् 10, परिभ्रम् 1, 4 P.

Expatriate, *vt* निष्कस् c, विवस् c.

Expect, *vt.* अपेक्ष् 1A, उद्दृश् 1 P. प्रतीक्ष् 1 A; -ant, *a.* आशंसु, सप्रत्याश; -ation, *n.* प्रतीक्षा, प्रत्याशा.

Expectorate, *vt.* उद्गॄ 6 P, निष्ठिव् 4 P; -ion, *n.* निष्ठ्यूतिः, श्लेष्मोद्गारः.

Expedience, -cy, *n.* औचित्यं, [उपयोगः.

Expedient *a.* युक्त, हित; *n.* उपायः, उपकरणं; -ly *adv.* यथोचितं.

Expedite, *vt.* त्वर् c, शीघ्रं प्रेष् 10; *a.* सत्वर, लघु.

Expedition, *n.* त्वरा, अभियानं, [साहसं.

Expeditious, *a.* त्वरान्वित, लघु; -ly, *adv.* सत्वरं. [क्ष 8 U.

Expel, *vt.* विवस् C, निःसृ C, अपाकृ

Expend, *vt.* व्यय् 10, उत्सृज् 6 P, क्षै C. अपचि 5 U. [क्षयः.

Expense, Expenditure, *n.* व्ययः,

Expensive, *a.* महार्घ, अतिमुक्तहस्त; -ly, *adv.* बहुव्ययेन.

Experience, *vt.* अनुभू 1 P, सह् 1A, भुज् 7 A; *n.* अनुभवः, प्रत्ययः, अभ्यासः; -ed, *a.* परिणतप्रज्ञ.

Experiment, *n.* प्रयोगः, परीक्षा; *vt.* परीक्ष् 1 A; -al, *a.* अनुभवजन्य, प्रत्ययार्थ; परीक्षामूलक; -ally, *adv.* परीक्षणार्थं.

Expert, *n* & *a.* प्रवीण, विज्ञ; -ness *n.* कौशलं, वैदग्ध्यं, दक्षता.

Expiate, *vt.* निष्कृ 8 U, शम् C; -ion *n.* निष्कृतिः, प्रायश्चित्तं; -ory, *a.* पावन, अघमर्षण.

Expire, *vt.* उद्-गॄ 6 P; *vi.* प्राणान् हा 3 P. समाप् Pass; -ation, -y, *n.* उपरमः, अवसानं; -ing, *a.* मुमूर्षु.

Explanation, *n.* विवरणं, समाधानं.

Explanatory, *a.* अर्थप्रकाशक, व्याख्यात्मक.

Explain, *vt.* व्याख्या 2 P. वर्ण् 10.

Expletive, *n.* पादपूरणं; *a.* पूरक.

Explicable, *a.* व्याख्येय, प्रकटनीय.

Explicate, *vt.* -See Explain.

Explicit, *a.* व्यक्त, असंदिग्धार्थ; -ly *adv.* स्पष्टं.

Explode, *vt.* खंड् 10, उच्चैरपवद् 1 A, *vi.* सशब्दं स्फुट् 6 P.

Explosion, *n.* सशब्दं स्फोटनं.

Explosive, *a.* अकांडभिदुर, शीघ्रदाह्य; *n.* स्फोटद्रव्यं.

Exploit, *n.* विक्रमः, अवदानं; -ation *n.* सारोद्धारः, आत्मसात्करणं.

Explore, *vt.* निरीक्ष् 1 A, मृग् 10, A; -ation, *n.* अन्वेषणं; -er *n.* आविष्कारकः, अन्वेष्टा.

Exponent, *n.* दर्शकः, आवेदकः, (बीजगणिते) घातचिह्नं.

Export, *vt.* बहिर्देशं प्रेष् 10; *n.* निर्गतं भांडं;-ation *n.* निर्गमनं.

Expose, *vt.* अपावृ 5 U, सत्यंस्वरूपं दृश् C, पदं नी 1 U;-ation, *n.* विवरणं; -itor, *n.* वृत्तिकारः; -ure, *n.* स्वरूपाविष्कृतिः, उद्घाटनं.

Expostulate, प्रत्यादिश् 6 P, सानुनयं व्यावृत् C; -ion, *n.* प्रत्यादेशः, अनुशासनं. [व्याख्याता.

Expound, *vt.* व्याख्या 2 P. -er, *n.*

Express, *a.* स्फुट, विशिष्ट; *n.* जांघिकः; *vt.* आविष्कृ, 8 U, उदाहृ 1 P. निष्पीड् 10; -ion, *n.* उच्चारः; आकृतिः; शब्दरचना; -ive, *a.* गमक, साकूत; -ively, *adv.* सार्थं, व्यक्तं; -iveness, *n.* व्यंजकत्वं.

Expulsion, *n.* अपसारणं, विवासनं.

Expugn, *vt.* (दुर्गं) लंघ् 10 A, वशीकृ 8 U.

Expunction, *n.* विलोपः, व्यामर्षः.

Expunge, *vt.* विलुप् C, अपमृज् 2 P.

Expurgate, *vt.* शुध् C;-ion, *n.* शोधनं; -ory, *a.* पावन.

Exquisite, *a.* उत्कृष्ट, अनुत्तम, पेशल; सूक्ष्म, तीव्र.
Extant, *a.* विद्यमान. [स्फुरित.
Extemporary,-raneous, *a.* तत्काल-
Extempore, *adv.* अचिंतितपूर्वं.
Extend, *vt.* तन् 8 U, वितृ 1 P, *vi.* वितन् pass. व्याप् 5 P. [प्रपंचः.
Extension, *n.* विस्तारः, दीर्घीकरणं,
Extensive *a.* विस्तीर्ण, व्यापक; -ly, *adv.* बहुशः, भूयसा.
Extent *n.* विस्तारः, प्रमाणं.
Extenuate, *vi.* कृशीकृ 8 U, (लघयति), प्रमृज् 2 P; -ion, *n.* उपशमः, लघूकरणं. [बहिर्देशः.
Exterior, *a.* बाह्य, *n.* बहिराकारः,
Exterminate, *vt.* उन्मूल् 10;-ion *n.* उत्पाटनं.
External, *a.* बाह्य; -ly, *adv.* बाह्यतः.
Extinct, *a.* निर्वाण, नष्ट; -ion निर्वाणं, उच्छेदः.
Extinguish, *vt.* निर्वा c, विनश् c.
Extirpate, *vt.* see Exterminate.
Extol, *vt.* वर्ण् 10, प्रशंस् 1 P.
Extort, *vt.* निष्कृष् 1 P. उपपीड् 10; -er, -ioner, *n.* परस्वापहारकः, प्रमाथी; -ion, *n.* परस्वापहरणं, बलात्कारः, हठः
Extra, *a.* अधिक.
Extract, *vt.* निष्पीड् 10, निष्कृष् 1 P, उत्पद् c; *n.* रसः; संग्रहः; -ion, *n.* निष्कर्षः; प्रभवः.
Extradition, *n.* अपराधिप्रत्यर्पणं.
Extramundane, *a.* लोकबाह्य; अतिसंसृति.
Extraneous, *a.* बाह्य, व्यतिरिक्त.
Extraordinary, *a.* असाधारण, विलक्षण; -ly, *adv.* अपूर्वं, चित्रं.
Extravagant, *a.* अतिव्ययिन्; अनियंत्रण; -ly *adv.* अतिमात्रं, मुक्तहस्तं.
Extravagance, *n.* व्ययातिमात्रा, अमिताचारः, अतिशयः.
Extravaganza *n.* उत्कटभावः
Extreme, *a.* परम, उद्दाम, गाढ, अंतिम, *n.* पराकोटिः, अंतः; सीमा; -ly, *adv.* भृशं, अतिमात्रं.
Extremity, *n.* पराकोटिः, अतिकृच्छ्रं.
Extricable, *a.* उद्धारयोग्य.
Extricate, *vt.* उद्-हृ 1 P, मुच् c; -ion, *n.* उद्धारः, मोचनं.
Extrinsic,-al, *a.* बाह्य, आगन्तुक.
Extrude, *vt.* उत्सृ c, निष्कस् c.
Exuberance, *n.* समृद्धिः, उपचयः,
Exuberant, *a.* समृद्ध, विपुल.
Exude, *vi.* प्रस्रु 1 P, *vt.* निःसृ c, उद्गृ 6 P; -ation, *n.* द्रवः, निर्यासः.
Exult, *vi.* प्रमुद् 1 A, उल्लस् 1P; -ant, *a.* उत्सिक्त, प्रमुदित; -ation, *n.* उत्सेकः, उल्लासः.
Eye, *n.* चक्षुः, नेत्रं, लोचनं, दृष्टिः; रंध्रं; मुकुलं; mind's e. प्रज्ञाचक्षुः; Physical e. चर्मचक्षुः; before one's eyes समक्षं, प्रत्यक्षं; *vt.* निरीक्ष् 1 A; -brow भ्रूः; e-glass उपनेत्रं; -lash पक्ष्म; -let, -hole गवाक्षः; -lid नेत्रच्छदः; -shot दृष्टिप्रसारः; -sore अक्षिशूलं; -witness. प्रत्यक्षसाक्षिन्; -less, *a.* चक्षुर्हीन, अंध, अच्छिद्र.

F.

Fabian *a.* सावधान, मंथर.

Fable *n.* कथा, आख्यानं, कल्पनासृष्टि:

Fabric *n.* वयनं; वस्त्रं; रचना; कल्पना.

Fabricate *vt.* निर्मा 3 A. क्लृप् c;–ion *n.* रचना, कपटरचना, मनःकल्पना; –or *n.* निर्माता.

Fabulist *n.* उपकथकः [अत्याधिक.

Fabulous, *a.* कृत्रिम, काल्पनिक,

Facade *n.* हर्म्यमुखं

Face *n.* मुखं, वक्त्रं; तलं, पृष्ठं, स्थिति: F. to f. संमुखं, मुखामुखि; Before the f. साक्षात्; In the f. of अनादृत्य; to turn away the f. विमुखीभू 1 P; to set one's face against प्रतिरुध् 7 P; to make faces at मुखभंगीं कृ; On the face of it आपाततः; to put a good f. on संतोषभावं प्रदृश् c; to fly in the f. of प्रतिरुध्; to show one's face उपस्था 1 P; –ing *a.* अभिमुख, संमुख.

Facet *n.* कणः, मुखं.

Facetious, *a.* रसिक, विनोदिन्.

Facial *a.* मुखविषयक.

Facile, *a.* सुकर, सुसाध्य, अनुकूल; –itate *vt.* सुकरीकृ.

Facility, *n.* सौकर्यं, सुसाध्यता, लाघवं.

Fac-simile, *n.* अनुकृतिः, प्रतिलिपिः.

Fact, *n.* वस्तु, वृत्तं; सत्यता, यथार्थता. In f.–वस्तुतः; A matter of f.–सत्यघटना. Matter–of–f. *a.* प्रकृत, सत्य.

Faction, *n.* प्रतिपक्षः; विसंवादः.

Factious, *a.* भेदिन्, कलहप्रिय.

Factitious, *a.* कृत्रिम, कल्पित.

Factor, *n.* प्रतिनिधिः; गुणनीयकः, गुण्यपदं; घटकावयवः.

Factory, *n.* शिल्पशाला, प्रावेशनं.

Faculty, *n.* कार्यशक्तिः, मनःशक्तिः; अधिकारः; गणः.

Fad, *n.* छंदः.

Fade, *vi.* म्लै 1 P; क्षि Pass; नश् 4 P; विवर्णीभू 1 P.

Faded, *p.p.* म्लान, क्षीण, विवर्ण, जीर्ण.

Fag, *vt.* श्रम् 4 P, खिद् 4P; –end, *n.* अकिंचित्करः शेषभागः.

Fagot, *n.* काष्ठभारः.

Fail, *vi.* क्षि Pass. भ्रंश् 4 P, विफलीभू 1 P. *n.* अकरणं, अवक्रिया; Without f. अवश्यमेव.

Failure, *n.* अभावः, असिद्धिः, लोपः.

Fain, *adv.* सानंदं, प्रकामं.

Faint, *vi.* मूर्च्छ् 1 P, मुह् 4 P, ग्लै 1 P; *a.* म्लान, शिथिल; विषण्ण; मंद; –hearted, *a.* भीरु, कातर, हीनसाहस; –ing *n.* मूर्च्छा, मोहः, निर्वेशः; –ly *adv.* मंदं, ईषत्; –ness *n.* ग्लानिः, दौर्बल्यं, मांद्यं.

Fair, *a.* सुंदर, शोभन, विशद, शुद्ध, न्याय्य, निर्व्याज, प्रसन्न; मध्य. The fair sex–स्त्रीजातिः; To bid f. आशां दा 3 P; Fair and square–न्याय्यभावः; *adv.* अनुकूलं, यथान्यायं; –ness *n.* सौंदर्यं; रूपं; शुद्धिः, ऋजुता; –y *n.* विद्याधरी, उपदेवता.

Fair, *n.* मेला, यात्रा, समाजः.

Faith, *n.* श्रद्धा, आस्तिकता; –ful, *a.* श्रद्धायुक्त, भक्तिमत्, अव्यभिचा-

रिन्; –fully, *adv*. भक्त्या, सत्यत्वेन; –fulness, *n*. भक्तिः, सत्यता, प्रतिपालनं, सतीत्वं; –less, *a*. अश्रद्धान, भक्तिहीन, विसंवादिन्, व्यभिचारिन्; –lessness *n*. अश्रद्धा, विश्वासघातः, असतीत्वं.

Falcon, *n*. श्येनः, शशादनः.

Falconer, *n*. श्येनजीवी, श्येनपालकः.

Fall, *vi*. पत् 1 P, भ्रंश् 4 P; away क्षि Pass, f. back परावृत् 1 A, अवस्था 1 A; –down अवपत् 1 P; f. foul of आक्रम् 1 P; f. in with संमन्; f. off अपसृ 1 P; f. on. आपद्, आक्रम्; f. out विवद् 1 P; f. short न्यूनीभू 7 P; f. sick पीडित–भू; f. under अंतर्गण् Pass; f. flat वृथा भू; f. through वृथा भू; –to आरभ् 1 A; Rise & f. पातोत्पाताः, चक्रनेमिक्रमः.

Fall *n*. पातः, भ्रंशः, अधोगतिः, प्रवणभूमिः, प्रपातः; water –f. जलप्रपातः.

Fallacious *v*. भ्रांतिजनक, असत्य, कुतर्कपूर्ण; –ness *n*. भ्रांतिमत्त्वं, हेत्वाभासः. [अपसिद्धांतः.

Fallacy *n*. वंचना, भ्रमः, हेत्वाभासः,

Fallibility, *n*. वंचनीयता, भ्रांतिमत्त्वं.

Fallible, *a*. वंचनीय, भ्रांतिजनक;

Fallow, *a*. अनुप्त, अकृष्ट, आरक्त.

False *a*. अनृत, अलीक, कृत्रिम, काल्पनिक, कूट, मोघ; f. pretence व्यपदेशः; A f. step पदस्खलनं, भ्रमः; f. *position* उपहास्यावस्था; to play one f. वंच्; c; –hood *n*. अनृतं, असत्यं, मिथ्यावादः; –ly *adv*. मिथ्या, मृषा; –ness *n*. असत्यता, कापट्यं, मंत्रभेदः; –ify *vt*. छल् 10 U, खंड् 10 U; *vi* असत्यं वद् 1 P. –ity *n*. असत्यता, अलीकता, मिथ्यात्वं.

Falter *vi*. स्खलितं वद् 1 P, वेप् 1 A; –ing *n*. भग्नस्वरः, गद्गदवाक्, स्खलनं.

Fame *n*. कीर्तिः, प्रतिष्ठा, ख्यातिः; Known to f. विख्यात; A house of ill f. वेश्यागृहं.

Familiar *a*. सुपरिचित, कौलिक, अभ्यस्त, प्राकृत. F. conversation विश्रम्भालापः; –ity *n*. सौहार्द, आत्मीयता, अतिपरिचयः;

Family *n*. कुलं, गोत्रं, अन्वयः, अभिजनः, कुटुम्बकं; In the f. way गर्भवती.

Famine *n*. दुर्भिक्षं, अकालः, प्रयामः

Famish *vt*. क्षुधया पीड् 10 U, कृशीकृ

Famous *a*. विख्यात, कीर्तिमत्, यशस्विन्. [f. the flame उद्दीप् c.

Fan, *n*. व्यजनं, चामरं, तालवृंतः;

Fanatic, –al *a*. भ्रांतबुद्धि, धर्मोन्मत्त; –ism *n*. धर्मोन्मादः, उन्मत्तता.

Fanciful, *a*. काल्पनिक, उत्कट, मायामय; –ness *n*. मनोलौल्यं, बुद्धिविलासिता.

Fancy, *n*. भावना, मनोलौल्यं, बुद्धिचापल्यं, अभिरुचिः.

Fancy, *vi*. मन् 4 A. *vt*. मनसा क्लृप् 10 U; रुच् 1 A; f. *goods* विचित्रवस्तूनि; f. work शिल्पकार्यं.

Fang, *n.* दंष्ट्रा, दशनं.
Fantasm, *n.* आभासः, कल्पना.
Fantastic,-al *a.* काल्पनिक,विलक्षण.
Fantasy, *n.* कल्पना, स्वप्नः.
Far, *a.* दूर, दूरस्थ, विप्रकृष्ट; *adv.* दूरे, आरात्, अत्यंत; as far as यथाशक्ति; F. & away दूरं; -fetched *a.* क्लिष्ट, असुकर; -sighted *a.* दूरदृष्टि, पारदृश्वन्.
Farce, *n.* प्रहसनं; -ical *a.* उपहास्य, अपरूप.
Fare, *n.* खाद्यं, अन्नं; आतरः; *vi.* वृत् 1 A, भुज् 7 A. -well *adv.* कुशलं भूयात्, स्वस्ति, भद्रं *n.* मंगल-कामना.
Farm, *n.* क्षेत्रं, भूमिः. -yard *n.* क्षेत्र-वाटिका; -er *n.* क्षेत्रपालः, कृषीवलः.
Farrier *n.* अश्ववैद्यः.
Farther *a.* दूरतर, अपर.
Farthest *a.* दूरतम, दविष्ठ.
Farthing *n.* कपर्दकः
Fascinate *vt.* मुह् c, मनो हृ 1 P; -ion *n.* मोहः, अभिमंत्रणं,इंद्रजालं.
Fashion *n.*आकृतिः;रीतिः,लोकाचारः; प्रकारः; *vt.* निर्मा 2 P, घट् 10 U; out of f. बहिर्भूत; अप्रचलित;-able *n.* लौकिक; उच्चसमाजविहारिन्.
Fast *n.* दृढ, निश्चल, गाढ; *adv.* दृढं, गाढं, स्थिरं; -asleep सुखसुप्त.
Fast *vi.* उपवस् 1 P; लंघ् 1 A; *n.* उपवासः, अनशनं, लंघनं; -en *vt.* बंध् 9 P. पिधा 3 P; संयुज् 7 P; -ening *n.* बंधनं, संधिः.
Fastidious *a.* दुराराध्य, सावज्ञ; -ness *n.* दुराराध्यत्वं, अवमानिता.
Fastness *n.* दृढता, दुर्गं, द्रुतता.
Fat *a.* पीवर, पुष्ट, स्थूल; *n.* मेदः, वसा; -en *vt.* प्यै c, पुष् c; -ness *n.* पीनता, स्थूलता; -y *a.* मेदस्विन्.
Fatal *a.* दैविक, नियत, घातक; -ism *n.* अदृष्टवादः; -ist *n.* अदृष्ट-वादी; -ity *n.* नियतिः; -ly *adv.* दैवात्, प्राणांतिकं.
Fate *n.* दैवं, विधिः; कालः, मृत्युः नाशः; Ill. f. ed दैवोपहत; to share the f. of दशायाः अंशभाक् भू 1 P.
Father *n.* पिता, जनकः; उत्पादकः; -in-law श्वशुरः; to be gathered to one's fathers मृ 6A; Adoptive father पोष्यपुत्रग्राही; -hood *n.* पितृत्वं, पितृभारः; -land *n.* जन्म-भूमिः; -ly *a.* पैतृक, पितृतुल्य.
Fathom *n.* व्यामः, वेधः; *vt.* वेधं परीक्ष् I A; व्यध् 4 P; -less *a.* अ-गाध, अतलस्पर्श.
Fatigue, *n.* क्लान्तिः, आयासः, कष्टं; *vt.* खिद् c, श्रम् c; -ed *pp.* खिन्न, क्लान्त, श्रान्त.
Fatuity, *n.* मूर्खता, बुद्धिभ्रंशः.
Fatuous, *a.* मूढ, दुर्मति.
Fault, *n.* दोषः, अपराधः, छिद्रं, प्रमादः; find f. with निंद् 1 P. -finder *n.* छिद्रान्वेषी;--iness *n.* अपराधिता, वाच्यता, सदोषत्वं;-less *a.* निर्दोष, अनवद्य, विशुद्ध; -y *a.* सदोष, अशुद्ध.
Favour, *vt.* अनुग्रह्, 9 P, उपकृ. *n.* प्रसादः, अनुकूलता, संश्रयः,

उपकारः; -able *a.* प्रसन्न, अनुकूल; -ably *adv.* सानुग्रहं, प्रियं; -ite *a.* प्रिय, दयित, अभीष्ट; -itism *n.* पक्षपातिता, पक्षानुग्रहः.

Fawn, *n.* मृगशावकः, कुरंगकः; *vi.* रुध् 4 A.

Fear, *n.* भयं, त्रासः, शंका; *vt.* भी 3 P, त्रस् 4 P, शंक् 1 A. *vi.* त्रस् 4 P, व्यथ् 1 A; -ful *a.* भयार्त, त्रस्त, घोर, भीषण; -less *a.* निर्भय, निःशंक, अकुतोभय, साहसिक.

Feasible, *a.* साध्य, संभाव्य, कृत्य.

Feast, *n.* उत्सवः, पर्व, यात्रा, संभोजनं; *vi.* प्रकामं भक्ष् 1 U; *vt.* भोजनेन संतृप् 10 U.

Feat, *n.* कर्म, चरित्रं.

Feather, *n.* पक्षः, पिच्छं; A f. in the cap गौरवचिह्नं; to f. one's nest परद्रव्येण स्वाभिलाषं पृ;-brained *n.* हीनबुद्धि;-y *a.* पक्षतुल्य, पक्षवत्.

Feature *n.* रूपं, आकृतिः.

Fecund *a.* बहुप्रज, उर्वर; -ity *n.* उर्वरता, अवंध्यत्वं. [तिक.

Federal, Federate *a.* संहत, सांघा-

Federation, *n.* संघः, संहतिः.

Fee, *n.* वेतनं, शुल्कः, दक्षिणा.

Feeble *a.* दुर्बल, असमर्थ, क्षीण; -ness *n.* दौर्बल्यं, क्षीणता, निःसत्त्वता

Feed *vt.* भुज् c, अश् c, भृ 3 P, पुष् 9 P; *vi* भुज् 7 A, अश् 9 P. *n.* भक्ष्यं, भोज्यं.

Feel *vt.* अनुभू 1 P; स्पृश् 6 P; परीक्ष् 1 A; ज्ञा 9 P; अनुकम्प् 9 A; -ing *n.* स्पर्शः, चेतना, रसः, करुणा; चित्तं; संवेदनं.

Feign, *vt.* मनसा कृप् 10 P; छल् 10 P; -ed *a.* कल्पित, कपट (in comp.)

Felicitation, *n.* अभिवंदनं, आप्यायनं, धन्यवादः.

Felicitous, *a.* सुभग, धन्य.

Felicity, *n.* परमानंदः, कल्याणं, निःश्रेयसं.

Feline, *a.* मार्जारीय, धूर्त. [7 P.

Fell, *a.* क्रूर, निष्ठुर; *vt.* पत् c, अवछिद्

Fellow, *n.* सहायः, बंधुः, वयस्यः, सजातिः; -student सतीर्थः; -feeling *n.* समदुःखित्वं, अनुकंपा;-ship *n.* सहायता; (In a college) वृत्तिः.

Felon, *n.* महापातकी, साहसिकः; -ous *a.* दुष्ट, आततायिन्; -y *n.* महापातकं, आततायिता.

Felt *n.* ऊर्णा, कंबलः.

Female, *n.* नारी, महिला, अबला.

Feminine, *a.* स्त्रैण, स्त्रीसुलभ, कोमल.

Fence, *n.* आवरणं, प्राकारः, गुप्तिः; *vt.* परिवृ 5 U. *vi.* दंडयुद्धं अभ्यस् 4 P; -ing *n.* यष्टिक्रीडा, आयुधविद्या.

Fender, *n.* अंगारगुप्तिः.

Ferment, *vt.* अंतःक्षोभं, जन् 10 U; आकुलीकृ *vi.* क्षुभ् 4 P, *n.* अंतःक्षोभः, उत्तापः, मण्डः, अभिषवः; -ation *n.* अंतःक्षोभः, उत्सेकः, उच्चंडता; -ed *a.* विकृत, उत्सिक्त.

Ferocious, *a.* रौद्र, मारात्मक, उग्र.

Ferocity, *n.* क्रौर्यं, उग्रत्वं.

Ferry, *n.* तरणिः, उडुपः, नौका.

Fertile, *a.* उर्वर, सफल, अवंध्य; –ity *n.* सफलता, उर्वरत्वं; –ise *vt.* सफलीकृ, आप्यै c. [उत्साहः.
Fervency, *n.* व्यग्रता, औत्सुक्यं,
Fervent, *a.* व्यग्र, उष्ण, उत्सुक; –ly *adv.* व्यग्रं, सोत्साहं.
Fervid, *n.* संतप्त, चंड तीव्र.
Fervour, *n.* तापः, तीक्ष्णता, तीव्रता.
Festival, *n.* उत्सवः, पर्व, यात्रा.
Festive, *a.* सानंद, हर्षण.
Festivity, *n.* उत्सवः, आमोदः.
Festoon, *n.* माला, हारः.
Fetch, *vt.* आनी 1 P, आहृ 1 P; निष्कृष् 1 P.
Fete, *n.* उत्सवः, *vt.* तृप् c.
Fetid, *a.* दुर्गंध, पूतिगंधि.
Fetter, *n.* निगडः, बंधः, शृंखला; *vt.* यंत्र् 10 U, संयम् 1 P, बंध् 9 P.
Fetus, foetus *n.* भ्रूणः, गर्भः.
Feud, *n.* कलहः, विग्रहः, युद्धं.
Feudal, *a.* भूम्यधिकारविषयक.
Feudatory, *n.* सामंतः.
Fever, *n.* ज्वरः, दाहः, तापः bilious; f. पित्तज्वरः, dengue f. संधिकसंनिपातः; typhoid f. आंत्रज्वरः; yellow-feverपित्तज्वर; remittent f. स्वल्पविरामज्वरः; Intermittent f. अंतरितज्वरः
Feverish, *a.*ज्वरित, ज्वरग्रस्त; अस्थिर.
Few, *a.* अल्प, परिमित, स्तोक.
Fiasco, *n.* विफलता.
Fiat, *n.* आज्ञा, नियोगः.
Fib, *n.* असत्यं, अलीकं.
Fibre, *n.* तंतुः, सूत्रं; –ous *a.* तंतुमय
Fickle, *a.* चंचल, अधीर, तरल;–ness *n.* तरलता, चापल्यं, अधीरता.
Fiction, *n.* कल्पना, रचना, कल्पनासृष्टिः, परिकथा. [अप्रकृत.
Fictitious, *a.* परिकल्पित, कृत्रिम,
Fiddle, *n.* सारंगी;–r *n.* सारंगीवादकः.
Fidelity, *n.* भक्तिः; विश्वास्यत्वम्; कर्तव्यपरायणता; f. to a husband पातिव्रत्यम्, सतीत्वम्.
Fidget, *n.* चापल्यं, अशान्तिः; –y *a.* अस्थिर, चंचल.
Fiducial, *a.* विश्वस्त, असंदिग्ध.
Fidiciary, *n.* न्यासधारी, विश्वस्तजनः.
Fie, *interj.* धिक्, शान्तम्.
Field, *n.* क्षेत्रम्, भूमिः; रणभूमिः; अवसरः; to take the f. विग्रहे प्रविश्.
Fiend, *n.* पिशाचः, दानवः, परमशत्रुः; –ish *a.* पैशाचिक, आसुर, नृशंस.
Fierce, *a.* क्रूर, प्रचण्ड, विकट; –ly *adv.* क्रूरं, तीव्रम्, व्यालवत्; –ness *n.* क्रूरता, उग्रता, संरंभः.
Fiery, *a.* आग्निमय, ओजस्विन्, कोपन.
Fifteen, *a.* पंचदशन्.
Fifth, *a.* पंचम, पंचमांश.
Fifty, *a.* पंचाशत्, अर्धशतं.
Fig, *n.* अंजीरः, न्यग्रोधः.
Fight *vi.* युध् 4 A, विग्रह् 9 U, *n.* युद्धं, विग्रहः, रणं. [कथा.
Figment,*n.* उद्भवनं, कल्पना, मिथ्या-
Figurative, *a.* लाक्षणिक, अलंकारात्मक;–ly *adv.* सालंकारं, सरूपकं.
Figure, *n.* आकारः, रूपं, प्रतिकृतिः, प्रतिमा; f. of speech रूपकं, अलं-

कार०, लक्षणा.
Figure, *vt.* कृ 8 U, विधा 3 U, आलिख् 6 U, चित्र् 10 U.
Filament, *n.* केसरः, तन्तुः.
Filch, *vt.* अपहृ 1 P, मुष् 9 P, –ing *n.* चौर्यं, अपहारः.
File, *n.* सूत्रं, पंक्तिः, लेख्यश्रेणी; लोहमार्जनी; rank & f. सैनिकगणः.
Filial, *a.* संतानोचित; f. duty पुत्रधर्मः; f. piety पितृभक्तिः.
Filings, *n.* लोहचूर्ण.
Fill, *vt.* पृ C, व्याप् 5 P, संभृ 3 P; पूर्णीकृ; *vi.* पृ pass. पूर्णीभू.
Fillip, *n.* अंगुलिघातः; उत्तेजना.
Film, *n.* पटलम्, सूक्ष्मत्वक्.
Filter, *vt.* शुध् C, *vi.* निस्यन्द् 1 A, *n.* जलपरिष्कारयंत्रं.
Filth, *n.* मलः, पंकः, अवस्करः,
Filthy, *a.* मलिन, अमेध्य, कुत्सित.
Filtration, *n.* परिस्रवणम्
Fin, *n.* मत्स्यपक्षः; अन्तः.
Final, *a.* अन्तिम, चरम. –ally *adv.* अंते, शेषे.
Finale, *n.* उपसंहारः
Finance, *n.* राजस्वं, आयः, कोषविद्या.
Financier, *n.* कोशाध्यक्षः, राजस्वसचिवः
Find, *vt.* अधिगम् 1 P, प्राप् 5 P, ज्ञा 9 U, अन्विष् 6 P; f. fault with निन्द् 1P;–ing *n.* अधिगमः, लब्धिः; निर्णयः.
Fine, *a.* सूक्ष्म, कोमल, शोभन; f. arts ललितकलाः.
Fine, *n.* अर्थदंडः; in f. शेषे, अन्ततः.
Fine, *vt.* दण्ड् 10 U, शुध् 10 U.
Finely, *adv.* सूक्ष्मं, सुंदरं, सुष्ठु.
Finery, *n.* शोभा, अलंकारः, वेषभूषा.
Finger, *n.* अंगुलिः, करपल्लवः; the fore f. *a.* प्रदेशिनी; middle f. मध्यमा; little f. कनीनिका; a f. of scorn घृणाचिन्हं; to have at one's f.'s ends करतलामलकवत् or आयत्त–भू.
Finish, *vt.* समाप् 10 U, संपद् 10 U, संस्कृ 8 U, साध् 10 U; *n.* समाप्तिः, सिद्धिः, अन्तः.
Finite, *a.* समर्याद, परिच्छन्न.
Fir, *n.* देवदारुः, इंद्रवृक्षः.
Fire, *n.* अग्निः, पावकः, दहनः, कृशानुः, हुताशनः, तेजः; f. brigade अग्निनिर्वापकदलं; f. arm अग्न्यस्त्रं; f. brand उल्का, अलातं; f. engine अग्निनिर्वापणयंत्रं; f. fly खद्योतः, प्रभाकीटः; f. place चुल्लिः, अश्मंत; f. poof अदाह्य; f. stick अग्निकाष्ठिका; f. wood इंधनम्; f. works अग्निक्रीडा; on f. दह्यमान; to take f. दह् 4 P; to set on f. अग्निं दा 3U; उत्तिज् C.
Firm, *a.* दृढ, स्थावर, अव्यभिचारिन्, घन; *n.* वणिक्संघः; –ly *adv.* दृढं; –ness*n.* दृढता, स्थैर्य, धृतिः, संहतिः.
Firmament, *n.* आकाशः, व्योम, अन्तरिक्षं, गगनमण्डलं.
First, *a.* प्रथम, पूर्व, प्राक्तन, मुख्य, प्रधान; f. & last पूर्वापर; of the f. water उज्ज्वलतम; at f. सर्वाग्रे; f. born अग्रज; f. rate (class)

उत्कृष्ट; -ly *adv.* प्रथमम्, आदितः.
Fiscal, *a.* राजस्वविषयक.
Fish, *n.* मत्स्यः, मीनः, जलजः; *vi.* मत्स्यान् ग्रह् 9 P. अन्विष् 1 P; f. monger *n.* मत्स्याजीवः. [जीवः,
Fisherman, *n.* धीवरः, कैवर्तः,मत्स्या-
Fissure, *n.* छिद्रं, रंध्रं, भंगः.
Fist, *n.* मुष्टिः, खटः.
Fisticuffs, *n.* मुष्टिघातः, मुष्टिप्रहारः.
Fistula, *n.* नाली; नाडीव्रणं.
Fit, *n.* आवेशः,आक्रमः, मूर्च्छा, घूर्णिः; *a.* युक्त, उचित, अनुरूप, क्षम. *vt.* आयुज् 10 U, संधा 3U, सज्ज् 1 P; *vi* युज्; pass. अर्ह् 1 P; उपक्लृप् 1 A; -ful *a.* चंचल, अनित्य; लोल; -ness, *n.* औचित्यं, याथार्थ्यं, पात्रता, उपयोगः.
Five, *a.* पंच, पंचतय; f. times पंचकृत्वः, f. fold पंचगुण, पंचधा.
Fix, *vt.* स्था C, धा 3 P, बन्ध् 9 P, निश्चि 5 P. *vi.* प्रणिधा pass; बंध् pass; -edly *adv.* दृढं, स्तिमितं, अनिमेषेण; -edness, fixity *n.* स्थिरता, अवस्थितिः, दार्ढ्यं, निष्ठा, संसक्तिः; -ture *n.* स्थावरद्रव्यं.
Flabbiness, *n.* शैथिल्यं, कोमलत्वं.
Flabby, *a.* शिथिल, स्निग्ध, मेदुर.
Flag, *n.* ध्वजः, केतनं, पताका; *vi.* म्लै 1 P, क्षि pass; खिद् 4 A. [क.
Flagrant, *a.* दारुण, अतिनिंद्य, दुष्य-
Flagrancy, *n.* अतिदुष्टता, वाच्यता.
Flake, *n.* स्तरः, कणा, फलकः.
Flambeau, *n.* उल्का, अलातं.
Flame, *n.* शिखा, अर्चिः, अग्निजिह्वा, ज्वाला. *vt.* ज्वल् C; *vi.* प्रज्वल् 1 P; -ing, *a.* उज्ज्वल, प्रदीप्त.
Flank, *n.* पार्श्वः, उत्संगः, कुक्षिः.
Flannel, *n.* कंबलः, ऊर्णायुः.
Flap, *n.* लंबिका, लोलकः; *vt.* उत्क्षिप् 6 P, आस्फल् C. *vi.* आस्फल् 1 P; विधू pass.
Flare, *n.* कंपितज्वाला, स्फुरद्द्युतिः; *vi.* चंचलरूपेण ज्वल् 1 P.
Flash, *n.* ज्वाला, स्फुरितं,अचलद्युतिः, आभासः; a f. of lightening विद्युज्ज्योतिः;-y *a.* क्षणप्रभ, असार.
Flask, *n.* कूपी, काचपात्रं.
Flat, *a.* सम, अभुग्न, अनुच्च, अवनींगत, नीरस, निस्तेजस्, अवक्र; to fall f. विफलीभू; f. -nosed नतनासिक.
Flat, *n.* समभूमिः, निम्नभूमिः, सैकतम्; -ly *adv.* स्फुटं,स्पष्टं;-ness *n.* समता; अनुच्चता; अरसिकत्वं; तेजोहीनता.
Flatter, *vt.* चाटूक्त्या सांत्व् 10 U; प्रियं वद् 1P; मिथ्या प्रशंस् 1P; -er *n.* चाटुकारः, मिथ्याप्रशंसकः, प्रियंवदः; -ingly *adv.* चाटूक्त्या, सांत्वनपूर्वं; -y *n.* सांत्वनं, चाटूक्तिः, अनुनयः, व्याजस्तुतिः. [ध्मानं.
Flatulence, *n.* वातः, स्फीतता, अंत्रा-
Flatulent, *a.* आध्मात, वातबद्ध.
Flaunt, *vi.* सगर्वं चर् 1 P.
Flavor, *n.* गंधः, आस्वादः.
Flavoured, *a.* स्वादु, सुगंध.
Flavorless, *a.* नीरस, अस्वादु.
Flaw, *n.* छिद्रं, दोषः, खंडः, प्रभंजनः; -less, *a.* निर्दोष, नीरंध्र.

Flax, *n.* अतसी, उमा, शणं; --en *a.* औम, शाण.

Flea, *n.* मक्षिका, देहिका; f. -bite मक्षिकादंशः (सामान्य व्यापारः)

Fled, P. P. पलायित, विद्रुत.

Flee, *vi.* पलाय् 1 A. द्रु 1 P; निष्पत् 1 P, परिवृज् 10 P.

Fleece, *n.* मेषलोम; *vt.* अपहृ 1 P; --y *a.* लोमावृत, रोमश.

Fleet, *n.* रणतरीसमूहः; *a.* शीघ्रगति, जवन; *vi.* द्रुतं गम् 1 P; f. footed *a.* क्षिप्रपद; -ing *a.* अध्रुव, क्षणिक; --ness *n.* शीघ्रगामित्वं, वेगः, रंहः.

Flesh, *n.* मांसं, आमिषं, क्रव्यम्; शरीरं; विषयासक्तिः; f. & blood रक्तमांसयुक्तं शरीरं; मानवजातिः; --less *a.* मांसहीन, क्षीण; --y *a.* मांसल, स्थूल, पुष्ट.

Flexibility, *n.* नमनीयत्वं, मृदुता.

Flexible, *a.* नम्य, कुंचनीय, कोमल.

Flicker, *vi.* चल् 1 P; चंचलीभू; --ing *a.* चंचल, चल, चपल.

Flight, *n.* पलायनं, अपयानं, विद्रवः; उड्डयनं; आतिशय्यं; to put to f. विद्रु c; f. of imagination कल्पनाविलासः; f. of stairs सोपानश्रेणिः.

Flimsiness, *n.* निःसारता, तेजोहीनता, दुर्बलता.

Flimsy, *a.* असार, निर्बल, निस्तेजस्.

Flinch, *vi.* विचल् 1 P, परावृत् 1 A, विमुखीभू.

Fling, *vt.* प्रक्षिप् 6 P, अस् 4P; विसृज् 6 P; *vi.* अवक्षिप् 6 P. *n.* प्रक्षेपः, पातः, अवक्षेपः; to have a f. at one विद्रूपीकृ.

Flint, *n.* अग्निप्रस्तरः, अरणिः. [लता.

Flippancy, *n.* वाक्चापल्यम्, वाचा-

Flippant, *a.* वाचाल, मुखर, निःसार.

Flirt, *vt.* सहसा क्षिप् 6P; *vi* अवक्षिप् 6 P; विलस् 1 P.

Flirt, *n.* परिहासः, विलासिनी, चपला.

Flirtation, *n.* लीला, विलासः, हावः, हृदयस्पंदनम्.

Flit, *vi.* प्रडी 4 A, लघु चल् 1 P. चंचलीभू, परिभ्रम् 4 P; -ing *n.* विचरणं, परिभ्रमणं.

Float, *vi.* प्लु 1 A, उन्मज्ज् 6 P; *vt* प्लु c, वह् c. *n.* प्लवः, विहित्रं, उडुपः. -ing *a.* प्लवमान, भासमान, अलग्न.

Flock, *n.* यूथं, व्रजः; संघः, समवायः, वृंदं, लोमगुच्छः *vi* समागम् 1 P, संकुलीभू 1 P.

Flog, *vt.* कशया तड् 10 U, चर्मदण्डेन प्रहृ 1P, -ing *n.* कशाघातः, यष्टिप्रहारः.

Flood, *n.* जलप्लावनं, जलोच्छ्वासः, प्रवाहः, वेला, प्राचुर्यम्; f. gate स्रोतोद्वारं, जलनिर्गमः; f. mark प्लावननिदर्शकरेखा.

Floor, *n.* तलं, गृहभूमिः, गृहमूलम्, कोष्ठः, फलकः *vt.* निपत् c.

Flora, *n.* वसंतिका, उद्यानदेवता; वनस्पतिकोशः.

Floral, *a.* पौष्प, कौसुम.

Florescence, *n.* पुष्पोद्गमः; पुष्पचयः.

Florid, *a.* उज्ज्वल, अलंकारप्रधान, पुष्पित.

Florist, *n.* मालाकारः, पुष्पविद्याज्ञः.

Flotilla, *n.* क्षुद्रनौकासमूहः.
Flounce, *vi.* अंगानि विक्षिप् 6 P. *n.* अंगविक्षेपः.
Flounder, *vi.* विप्लु 1 A, अंगानि इस्ततः क्षिप् 6 P.
Flour, *n.* गोधूमचूर्णं, पिष्टं, सक्तुः.
Flourish, *vi.* समृध्, 5 P, संवृध् 1 A; गर्वितवाक्यं आश्रि; *vt.* पुष्पादिना अलंकृ, भ्रम्c; *n.* शोभा, अलंकारः, दर्पवाक्यं, उद्भ्रमः, वाद्यघोषः; –ing *a.* समृद्ध, वृद्धिशील, सुस्थ.
Flout, *vt.* अवाक्षिप् 6 P, तिरस्कृ 8 U, *n.* अवज्ञा, उपहासः.
Flow, *vi.* स्रु 1 P, क्षर् 1 P, प्रसृप् 1 P; प्रवृत् 1A, *n.* प्रवाहः, निस्यन्दः; वेगः, प्राचुर्यम्.
Flower, *n.* पुष्पं, कुसुमं, प्रसूनं, अलंकारः; उत्कृष्टांशः; f. of life यौवनं; f. gathering पुष्पचयः; f. bud पुष्पकलिका; f. show पुष्पप्रदर्शनी; f. stalk पुष्पवृंतं, मंजरी; f. garden पुष्पोद्यानं.
Flower, *vi.* पुष्प् 4 P. फुल्ल् 1 P, विकस् 1 P; *vt.* पुष्पादिना अलंकृ; –ing *a.* प्रफुल्ल, कुसुमित, पुष्पित; –y *a.* पुष्पित, अलंकारपूर्ण, व्यंजनामय.
Fluctuant, *a.* लोलमान, विचल.
Fluctuate, *vi.* विलुठ् 1 A, विचल् 1P, –ing *a.* दोलायमान, चल, तरलायित; –ion *n.* विचलनं, आंदोलनं, परिवर्तनं, संदेहः. [वाक्चापल्यं.
Fluency, *n.* वाग्मिता, वाक्शीघ्रता,
Fluent, *a.* अस्खलितवाच्, अनर्गल.
Fluid, *a.* तरल, द्रव; *n.* द्रवः, रसः; –ity *a.* तरलत्वं, द्रवत्वं, विलीनता.
Flush, *vt.* अरुणीकृ, 8 U, रंज् c, हृष्. c; *n.* कपोलरागः, प्राचुर्यम् *a.* तेजस्विन्, समृद्ध. [व्यग्रता.
Fluster, *n.* रक्तिमा, चित्तविभ्रमः.
Flute, *n.* वेणुः, मुरली.
Flutter, *vi.* आस्फल् 10 U, चल्, c, स्फुर् 6 P. *n.* स्फुरणं, संभ्रमः; व्यस्तता,
Flux, *n.* प्रवाहः, संगमः, क्षरणं, परिवर्तनं, द्रवीभावः; –ible *a,* द्राव्य, गलनीय.
Fly, *vi.* डी 4 A, उत्तप् 1 P, त्वरितं गम् 1 P; अपक्रम् 1 P, *vi.* वृज् 7 U, परिहृ 1 P; to f. at सहसा आक्रम् 1 A; to f. in the face of अधिक्षिप् 6 P; to f. into a passion क्रुध् 4 P.
Fly, *n.* मक्षिका, मशकः, नीला; –leaf *n.* मलपृष्ठम्; –wheel *n.* महत् चक्रं; –ing *n.* डयनं, उत्पतनं; *a.* डयमान, नभोगति; to come off with flying colours जी 4 P; सदर्पम् आगम्; 1 P; f. visit द्रुताभिगमनम्.
Foal, *n.* अश्वशावकः.
Foam, *n.* फेनः, मण्ड., उत्सेकः –y *a.* फेनल, फेनवत्.
Focal, *a.* आधिश्रयणिक.
Focus, *n.* केंद्रं, नाभिः, अधिश्रयणं; *vt.* एकत्रीकृ.
Fodder, *n.* घासः, तृणं, पशुभोजनं.
Foe, *n.* शत्रुः, प्रतिपक्षः. अरिः, अहितः
Foetus, *n.* गर्भः, भ्रूणः.
Fog, *n.* धूमिका, कुज्झटिका, कुहा, संदेहः; –gy *a.* धूमल, मेघाच्छन्न,

संदेहात्मक.

Foible, *n.* छिद्रं, दोषः, दुर्बलता.

Foil, *vt.* प्रतिहन् 2 P, विफलीकृ, पराणी; *n.* भंगः, प्रतिहतिः; निष्फलता, धातुपत्रं; प्रभावर्धकम्.

Foiled, *a.* हताश, पराभूत, भग्नोद्यम, तिरस्कृत. [क्लृप् 10 U,

Foist, *vt.* छलेन निविश् c, मिथ्या-

Fold, *n.* व्रजः, गोष्ठं, पुटः, व्यावर्तनं. *vt.* व्यावृत् 10 P, संपीड् 10 P, संवृ 5 P,–ed *p. p.* पुटित, गुणित, वेष्टित, with f. hands कृतांजलिः;–ing *n.* पुटीकरणं, व्यावर्तनं.

Foliage, *n.* पत्रं, पर्णं, पल्लवः, पत्रगुच्छः

Folio, *n.* बृहत्पत्रं, पत्रांकः.

Folk, *n.* लोकः, जनः, जनता; f. lore लौकिकसारस्वतम्; f. tale ऐतीह्यं

Follow, *vt.* अनुगम् 1 P, अनुया 2 P, अनुकृ 8 U. अनुष्ठा, 1 P. आश्रि 1 U; as follows वक्ष्यमाण; –er *n.* अनुगामी, अनुगः, भक्तः, परिजनः, उपजीवी, सहचरः; –ing *a.* अनुग, अनुपथ; *n.* अनुगमनं, अनुचरवर्गः.

Folly, *n.* मौर्ख्यं, बुद्धिहीनता, अज्ञानं, अपराधः, दुष्कृत्यं.

Foment, *vt.* स्विद् c, उत्तिज् 10 U, उपजप् 1 P; –ation *n.* स्वेदनं, सेकः, उद्दीपनं.

Fond, *a.* अनुरक्त,आसक्त, तत्पर, प्रिय; –le *vt.* परिष्वज् 1 P, अनुरागं कृ, लल 10 P;–ling *n.* लालनंः, प्रेमपात्रं, –ly *adv.* प्रीतिपूर्वकं, वात्सल्येन, मूढवत्; –ness *n.* प्रीतिः, अनुरागः, वात्सल्यं, अभिरुचिः.

Food, *n.* अन्नं, आहारः, खाद्यद्रव्यं.

Fool, *n.* मूर्खः, अज्ञः, जडः, विदूषकः, भण्डः; to make a f. of हास्यास्पदं कृ; to play the f. मूढवत् आचर्; a f.'s paradise अज्ञानामोदः;–ery *n.* मूर्खता, बालिश्यम्; –hardy *a.* अविचारिन्, साहसिन्; –hardiness *n.* अतिसाहसिकत्वं, प्रमत्तता; –ish *a.* मूर्ख, मूढ, अल्पधी, बुद्धिहीन, बालिश; –ishly *adv.* मूर्खवत्, अज्ञानात्; –ishness *n.* मौर्ख्यं, मूढता, अज्ञानं, बालिशता.

Foot, *n.* पादः, पदं, चरणः; तलं; मनुष्यपादपरिमाणं; –ball पादकंदुकः; –board पादपीठं –man पदातिः print पदचिह्नं; f. –path पादरथ्या; note पादटिपनी; –passenger पादचारी, पथिकः; –soldier पदातिः; –step पदक्षेपः; –stool पादपीठं; walk on f. पद्भ्यां व्रज्; to set on f. प्रवृत् c, उपक्रम् 1 A; –ing *n.* भित्तिः, पदविक्षेपस्थानम्; on the same f. समानावस्थापन्न.

Fop, *n.* रूपगर्वितः, सुवेशनंमन्यः, छेकः. –pery *n.* सुवेशमानिता, मूर्खता; –pish *a.* वेशाभिमानिन्.

For, *conj.* यतः, येन, इतिहेतोः, *prep.* प्रति with abl; स्थाने, उद्दिश्य with acc. अर्थं कारणात्, कृते, यावत्, पर्यंतम्, प्रायेण; f. all that तत्रापि; f. ever चिरं; as f. me मामपेक्ष्य, मत्कृते; f. life यावज्जीवनं; but f. विना.

Forage, *n.* खाद्यद्रव्यं, खाद्यद्रव्यान्वेषणं.

Foray, *n.* उपद्रवः; विप्लवः.

Forbear, *vi. vt.* निवृत् 1 A, विलंब्, 1 A, सह् 1 A, परिवृज् 10 U; -ance *n.* निवृत्तिः, विरामः, त्यागः, क्षान्तिः, सहिष्णुता, संयमः; -ing *a.* क्षमिन्, संयमिन्.

Forbid, *vt.* प्रतिषिध् 1 P, प्रत्याख्या 2 P, वृ c, Heaven f. शांतं, इत्थं न भूयात्; -dance *n.* निषेधः, वारणं, निरोधः; -en *pp.* निषिद्ध, निवारित; f. en degrees सापिण्ड्यसीमा.

Force, *n.* बलं, सामर्थ्यं, वीर्यं, तेजः, साहसं, वेगः, प्रभावः, सिद्धिः; सैन्यम्. centrifugal f. केंद्रविमुखबलं; centripetal f. केंद्रानुसारिबलं; by f. बलात्, बलपूर्वकं; in f. प्रचलित; to come into f. प्रचलित-भू; moral f. नैतिकबलं; physical f. प्राकृतिकबलं; resolution of f. s बलविश्लेषणम्; to bring into f. प्रवृत् c. *vt.* बलेन प्रवृत् c, प्रेर् 10 P, घुष् 10U; -ful *a.* बलवत्, प्रबल; -ible *a.* प्रबल, समर्थ, प्रभविष्णु, साहसिक, ओजस्विन्; -ibly *adv.* बलात्कारेण, प्रसह्य, निर्बंधेन.

Ford, *n.* तरणस्थानं, घट्टः, *vt.* पद्भ्यां तॄ 1 P; -able *a.* सुतर.

Fore, *a.* पूर्व, अग्रगामिन्; *adv.* पूर्वं, अग्रे, प्राक्; -arm *n.* प्रकोष्ठः, अग्रबाहुः; *vt.* युद्धार्थं पूर्वं सज्जीकृ;-bode *vt.* अनिष्टघटनां पूर्वं सूच् 10 U, पूर्वचिह्नं दा 3 U; -boding *n.* पूर्वसूचना, अनिष्टप्रदर्शनम्; -cast *vt. vi.* पूर्वचिंत् 10 U, अग्रकल्पनां कृ *n.* अग्रनिरूपणं, दीर्घदृष्टिः; -closure *n.* प्रतिबंधः, प्रतिषेधः;-determine *vt.* अग्रे निश्चि 5 U; -doom *vt.* पूर्वं निर्दिश् 6 P; -fathers (pl) पूर्वपुरुषाः, पूर्वजाः, पितरः; -finger *n.* तर्जनी; -foot *n.* संमुखीनपादः; पूर्वपादः; -go *vt.* त्यज् 1 P, उत्सृज् 6 P, हा 3 P; -gone *a.* त्यक्त; पूर्वनिर्दिष्ट; a f. conclusion पूर्वनिर्णीतसिद्धांतः; -ground *n.* पूर्वभागः, दृश्यमुखं; -head *n.* ललाटं, भालं, निटलं.

Foreign, *adj.* बाह्य, अन्य, विदेशीय, -er *n.* वैदेशिकः, भिन्नदेशीयः.

Fore-knowledge, *n.* पूर्वज्ञानं, प्रवेक्षणं, पूर्वदृष्टिः.

Fore-lock, *n.* ललाटकेशः to take time by the f. सुयोगं साध् 4 P.

Fore-man, *n.* परिदर्शकः, अधिष्ठाता.

Fore-most, *a.* अग्र, प्रमुख, प्रधान, श्रेष्ठ.

Fore-noon, *n.* पूर्वाह्णः, प्राह्णः.

Forensic, *a.* व्यावहारिक, न्यायविषयक; f. eloquence सदसि वाक्पटुता.

Fore-ordain, *vt.* पूर्वं निरूप् 10 U, पूर्वं निर्दिश् 6 P.

Fore-part, *n.* अग्रभागः, प्रथमांशः.

Fore-run, *vi.* अग्रे सृ 1 P, पुरोगम् 1 P. -er *n.* अग्रेसरः, अग्रदूतः, निमित्तं.

Fore-see, *vt.* प्रवेक्ष् 1 A; -ing *a.* दूरदर्शिन्, अंतरज्ञ; *pp.* प्रवेक्षित, संदृष्ट.

Fore- shadow, *vt.* पूर्वाभासं दा.

Fore-shower, *n.* वेलाभूमिः.

Fore-sight, *n.* दूरदृष्टिः, विमृश्यकारिता.

Forest, *n.* अरण्यं, वनं, कांतारं.
Forestry, *n.* वनरक्षणविद्या.
Fore-stall, *vt.* पूर्वग्रह् 9 P, वंच् c.
